## ।। अथ षड्चत्वारिंशोऽध्याय: ।। chapter-46

मांधातोवाच :- कथमासीदहिल्याया हृदो ब्रह्मविदां वर ।।
पुष्पमाले महातीर्थे तन्मे ब्रूहि तपोघन ।। १

वसिष्ठ उवाच :- रथयात्रोत्सवे राजन् चण्डीशस्य प्रभो: पुरा ।।
देवा: सिद्धास्तथा यक्षा नागा ब्रह्मर्षयो मला: ।। २

मनुष्याश्च महात्मानो गन्धर्वाश्चाप्सरोगणा: ।।
समाययुर्महीपाल सर्वालंकरणोज्ज्वला: ।। ३

समस्ता मुनिपत्न्यश्च मुनयो दीर्घदर्शिन: ।।
तथा मुनिकुमाराश्च तत्रागार्हस्थ्यशालिन: ।। ४

रथारूढे जगन्नाथे चण्डीशे चण्डी का प्रिये ।।
आययौ मुनिपत्नीभिरावृता गौतमप्रिया ।। ५

अहिल्या नाम चार्वङ्गी पीनश्रोणिपयोधरा ।।
कुण्डलाभ्यां सुदीप्ताभ्यां भासयन्ती मुखाम्बुजम् ।। ६

-०-०-

१ बी शालिन: ए शीलिन:

३ बी आययौ मुनिपत्नीभिराद्दता

१ ए तपोधन

विधूमाग्निशिखाप्रख्या तपोनिर्धूतकिल्बिषा ॥
स्पृहयन्ती सदा यस्याः सौभाग्याय सुरांगनाः ॥ ७

अधिष्ठात्रीव लोकेस्मिन् सर्वसौभाग्यसंपदाम् ॥
विश्वोन्मादकरो मासःस तदा मधुसंज्ञितः ॥ ८

मुनीनामपि चेतांसि विकुर्वन्नभ्यवर्तव ॥
श्रूयन्ते मधुरावाचः कोकिलानां मनोहराः ॥
चूतकुण्डलकाषायरसरिक्ता इवोज्ज्वलाः ॥ ९

बबन्ध वृक्षशाखासु मुकुलोंगमचारुणु ॥
दोलालीलोत्सवे स्त्रीणां तोरणानीव षट्पदान् ॥ १०

अथ काचित्समीपस्था ब्राह्मणी धर्मचारिणी ॥
कुरूपा हसिता राजन् कृष्णादिहिल्ययार्थ्या ॥ ११

विप्रादिजनसंबाधे समाजे मुनियोषिताम् ॥
कृद्धा शशाप शाण्डिल्यां स्वरूपमदमोहिताम् ॥ १२

-०-०-

१ बीअन्यर्थं

ब्राह्मण्य उवाच :- दर्पमित्थम्भुतं यस्य रूपस्य बहसे शुभे ।।
चिरं तदस्य संभोगे दूषितं वै भविष्यति ।। १३

वसिष्ठ उवाच :- इत्युक्त्वा ब्राह्मणी सा च ययौ कृद्धा निजं गृहम् ।।
अहिल्या तन्न शुश्राव जनौघस्य रवे सति ।। १४

किमानवरमारूढो व्योम्ना वृत्रनिषूदन: ।।
तां ददर्श मुने: पत्नीमहिल्यामतिसुंदरीम् ।। १५

मनसा कामयामास मनोभवशराहत: ।।
गौतमस्य मुने: पत्नी, अहिल्येयं शुचिस्मिता ।। १६

रूपेणाप्रतिमा लोके तथा दृष्टा यथा श्रुता ।।
अपेतविक्ष्याणां हि कृशानां तपसा भृशम् ।। १७

उटजेषु महर्षीणां कष्टमेतद्विधा: स्त्रिय: ।।
इति चिन्तयतस्तस्य निवृत्त: स महोत्सव: ।। १८

प्रययौ मुनिपत्नीभि: सहाहिल्या स्वमाश्रमम्
सुरैपरिवृत्त: श्रीमानुशक्रोपित्रिदिवंगत: ।। १९

—०—

३ अ ई साचाहिल्या

१ ए चिरंतपस्या

२ इ नां

प्रणाम्य देवदेवेशं चण्डीशं चण्डिकां च ताम्
देवा नागा मनुष्याश्च ययुः सर्वे गृहान् प्रति ।। २०

शक्रस्तद्दिनमारभ्य गौतमप्रेयसीं प्रति ।।
साभिलाषो महेष्वासो लक्ष्यमासीन्मनोभुवः ।। २१

अतएव समाजे पुंस्समीपे वानरेऽपि वा ।।
नगन्तुमुचितं राजन् कदाचित् कुलयोषिताम् ।। २२

नतीर्थे नोत्सवः कश्चिन्न वृन्दः सुहृदामपि ।।
परोक्षमभिगम्यानि न पत्युश्च क्वचन स्त्रिया ।। २३

कदाचिदथ देवेन्द्रश्छिद्रं प्राप्य वराश्रमे ।।
गौतमस्य प्रियां भार्यामहिल्यामभ्यगच्छत ।। २४

इन्द्रो गौतमरूपेण कामिनीमभिगम्य ताम् ।।
अद्राक्षीदाश्रमाद्गच्छन्नायान्तं गौतमं पुरः ।। २५

ततो मुनिरभिप्रायं विदित्वोभयतः क्रुधा ।।
शशापेन्द्रमहिल्यां च तुल्यकालो महातपाः ।। २६

—०—

निःकोशं कृतवानिन्द्रमहिल्यां च शिलां वने ।।
जगामाथ तपस्तप्तुमद्रिराजं मनोजवः ।। २७

ततो बहुतिथे काले रामं दृष्ट्वा रघूद्वहम् ।।
अहिल्या तत्र वै पाशान्मुक्ता[1] प्रकृतिमीयुषी ।। २८

शतानन्दं पुरस्कृत्य श्रीमालमभिसंस्पृहा ।।
गच्छन्ती स्वर्णशैलस्य पार्श्वे मध्यंदिने स्थिता ।। २९

अथ नद्यां कृतस्नानशतानन्द समाहृतैः
चक्रे धात्रीफलैः पक्कैः सा चाहारमतन्द्रितम् ।। ३०

अथैकं फलमादाय धृत्वा करतले चिरम् ।।
सस्मार श्रियमेणाक्षीं श्रीमालस्याधि देवताम् ।। ३१

इदं चाभ्यवदद्देवीं फले निर्दिश्य सिंधुजाम् ।। ३२

अहिल्योवाच :- मया मातः कृतं पापमतुलं कीर्तिनाशनम् ।
येनासीद्गौतमः क्रुद्धो महात्मा तपसां निधिः ।। ३३

-o-

१ बी मिथिलासविधे: शापान् मुक्ता प्रकृतिमीयुषी

न्त्यपि

चिरं तस्य मुनेः शापमहमनुभवन्त्यपि ।।
एकाकिनी शिलीभूता परितो भस्मसंवृता ।। ३४

साम्प्रतं मम दीनायाः शंकितायाः[1] पदे पदे ।।
शरणं त्वमसि मे मातर्ब्रह्मविष्णुशिवात्मिके ।। ३५

त्वमस्य जगतो धात्री त्वमस्य त्राणहेतुकी ।।
त्वया देवी जगत्सर्वमिदं व्याप्तमनारतम्[2] ।। ३६

प्रवर्तन्ते मनोभावा ये केचित् स्त्रीनृणामिह ।।
तथोद्विग्नतया[3] देवि भवेयुस्ते न संशयः ।। ३७

कल्पान्तस्थायि मालिन्यमिदमासीन्ममोपरि ।।
अप्रसादश्च सुमहान् गौतमस्य तपस्विनः ।। ३८

वशिष्ठ उवाच :- इति संस्तूयमाना श्रीः क्षणादामलकीफलात् ।
प्रादुर्भूता महादेवी सलिलादिव पद्मिनी ।। ३९

तेजसाभासयन्तीव नभोत्सर्गे यथा तडित् ।।
विशाललोचना सुभ्रूश्चारुकोटीरकुण्डला ।। ४०

-०-

२ र मनातुरम्
१ र शंकिताया
३ र तथोद्विक्लतया देवि

देव्युवाच :- मा भयं कुरु कल्याणि कदाचिदपि गौतमात् ॥
स मुनिस्त्वद्वियोगार्तो धृति नाप्नोति पर्वते ॥ ४१

वरं वृणु महाभागे यस्ते मनसि वाञ्छितम्
दास्यामि तन्न संदेहस्तुष्टाहं स्मरणादपि ॥ ४२

अहिल्योवाच :- इहैव तिष्ठ देवेशि सुवर्णस्य समीपतः ॥
भवामि कीर्तनीयाहं यथा भुवि शरीरिणाम् ॥ ४३

देव्युवाच :- इह वत्स्याम्यहं नित्यं प्रीत्या तव तपोवने ॥
भक्तेभ्यो भयदा सद्यः कीर्तिदा वरदा भुवि ॥ ४४

शक्रसंगमशापार्ता यः कथां तव मानवः ॥
कथयिष्यति मर्त्यानां तस्य पापाद्भयं क्वचित् ॥ ४५

अहं मामलकाज्जाता स्मरणात्ते तपस्विनि ॥
तस्मादामलजा नाम लोके मम भविष्यति ॥ ४६

-०-

वसिष्ठ उवाच :- ⁶इत्युक्तवांस्तदैवे देवी दृष्टा स्वप्ने यथा नृप ,।
अहिल्यापि शतानन्दमिदमाह सगद्गदम्[1] ॥ ४७

अहिल्योवाच :- स्नानं कृत्वा नमिष्यामि वत्स देवीं हरिप्रियाम् ।
दर्शयस्व तदासन्नमिहकं[2]चिज्जलाशयम् ॥ ४८

वसिष्ठ उवाच :- अहिल्यावचनस्यान्ते शतानन्दस्तपोधनः ॥
स्मृत्वा सरस्वती देवी कुशेराभ्यवधीद्भुवम् ॥ ४९

उदतिष्ठत्ततो राजन् वारिधारा[3] सुधोज्ज्वला ॥
तत्र स्नानं चकाराथ अहिल्या गौतमप्रिया ॥ ५०

आचम्यांजलिमाधाय जलपूर्णां[4] समाहिता ॥
अर्घं चकार सूर्याय नमस्यन्ती मुहुर्मुहुः ॥ ५१

हृष्टं गौतममाहेदमहिल्यां चामितप्रभाम्
वरयेथां वरं श्रेष्ठं युवयोस्त्रिदिवौकसः ॥ ५२

अथ तुष्टा प्रदास्यन्ति यद्यपि स्यात् सुदुर्लभम् ॥ ५३

-०-०-

१ बी अहिल्यापि शतानन्दमादाय श्रीपुरं ययौ ।
१ बी में अधिकश्लोक, १ अदूरे सावनं (१) दैव्या माणिकाच्चनया
(१) वृतम् ।
दृष्ट्वाव हिल्या शतानन्द मिदमाह सगद्गदम् ॥
(मूल पुस्तिका नामस्त)

२ए किंचिज्जलाशयम्
३ ए वारिधारां सुधोज्ज्वलाय
४ ए जलपूर्णां

गौतमुवाच :- अहिल्याह्रदयाम्ना वै ख्यातोऽस्त्वेष जलाशय: ।।
यत्र स्नानं प्रकुर्वन्ति देवीं पश्यन्ति च श्रियम् ।। ५४

मनुष्यास्ते प्रिय योगात् सुखिन: सन्तु सर्वदा ।।
शक्रशापवियोगं च संयोगं चावयोस्तथा ।। ५५

श्रृण्वन्ति ये नरा भक्त्याप्र प्राप्नुवन्ति शुभानि ते ।। ५६

वसिष्ठ उवाच :- एवं भविष्यतीत्युक्त्वा सुपर्वाणस्तिरोदधु:ज्जा।
गौतमोऽहिल्यया सार्धं देवीं मत्वा हरिप्रियाम् ।। ५७

शिष्यै: परिवृतो धीमान् जगाम निजमाश्रमम्
इदं ते कथितं राजन्नहिल्याह्रदसंभवम् ।। ५८

यच्छ्रुत्वा मानव: सम्यक् सर्वपापै: प्रमुच्यते ।। ५९

इति श्री अहिल्याह्रद नाम षड्चत्वारिंशोऽध्याय: ।। ४६

2X ए इदं
1X ए पश्यन्ती